
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-486

कविकुलगुरु कालिदास संस्कृत
विश्वविद्यालय ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M 486 विषय पुराण
नांव- रामगीता टीका
लेखक/लिपीकार विष्णुराम मीसर
पृष्ठ... ३२...
काळ संवत् १८९८ पूर्ण/अपूर्ण ....

M-486

॥ःअथरामगीताटीकाकृतप्रारंभ॥

श्रीगणेशायनमः॥ श्रीगुरुभ्योनमः॥ श्रीसरस्वत्यैनमः॥
गणेशंकमलानाथंप्रणिपत्यगुरोःपदं॥ करिष्येरामगीता
यांव्याख्यानंबालबुद्धये॥१॥ अल्पग्रंथेनब्रह्मविद्यावाजि

श्रीरामायनमः॥ ततोजगन्मंगलमंगलात्मनाविधायरामा
यणकीर्तिमुत्तमां॥ चचारपूर्वाचरितंरघूत्तमोराजर्षिव
र्यैरपिसेवितंयथा॥१॥
ज्ञापयिषुर्वाल्मीकिः कथाप्रसंगमाह॥ ततइति॥ जगतां
मंगलस्यापिमंगलरूपेणात्मनाउत्तमांरामायणकिर्तिं
रावणादिवधेनस्वयशोविधायराजर्षिवर्यैरुत्तमन्टपैःका
कुस्थादिभिःसेवितंपूर्वाचरितंधर्मंचचारसेवितवान्रघूत्तमोरामः

सौमित्रीणेमिति लक्ष्मणेनोदारबुद्धिना धीमता पृष्टो रामः
शुभाः पुरातनी कथाः प्राह पुनः राघवः प्रमत्तस्यासावधा

सौमित्रिणा पृष्टउदारबुद्धिना रामः कथां प्राह पुरातनीं शुभाः
राज्ञः ःप्रमत्तस्य नगस्य शापतो द्विजस्य तिर्य्य[illegible] मथाह राघवः २ कृत्व

नस्यप्रांसावि प्रधेनुं ददतो नगस्य राज्ञः विप्रशापतस्ति
र्यक्कृकलासत्वमाह तस्मात्सावधानेन राज्ञा भाव्यमिति
भावः॥२॥ ६७ ६९ ६९ ६९ ६९ ६९ ६९

कदाचिदिति ॥ कदाचिदेकांते स्थितं रमया सीतया लालितं सेवितं पादपद्मं यस्य तं प्रभुं रामं सौ ॥ मित्रिर्लक्ष्मणो भक्त्या

कदाचिदेकांतमुपस्थितं प्रभुं रामं रमालालितपादपंकजं सौमित्रिरासादितशुद्धभावनः प्रणम्य भक्त्या विनयान्वितोऽब्रवीत् ॥ ३ ॥

स्नेहेन प्रणम्याब्रवीत् ॥ कीदृशः आसादिता शुद्धभावना बुद्धिर्येनासौ तथा विनयपुरःसरम् ॥ किमुवाचेत्याह ॥ त्वमिति ॥ हे राम त्वं शुद्धबोधो निर्मलज्ञानोऽसि सर्वदेहिनामात्मा चासि ॥

किमुवाचेत्याह ॥ त्वमिति ॥ हे राम त्वं शुद्धबोधो निर्मलज्ञानोसि
सर्वादेहिनामात्मा त्वासि ॥ अधीशः प्रभुश्चासि ः स्वयं निराकृ
तिः ॥ निर्गता प्रकृतिराकारो यस्मान्निराकारः ॥ तथापि ज्ञा

सौमित्रिरुवाच ॥ त्वं शुद्धबोधोसि हि सर्वदेहिनामात्मास्यधी
शोसि निराकृतिः स्वयं ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्ज

भृंगा [illegible] हितसंगसंगिनां ॥ ४ ॥

नदृशां ज्ञानिनां त्वं प्रतीयसे भासि कीदृशानां ज्ञानदृशां तेन तव
पादांबुजे भृंगाहितः अर्पितः संगो यैस्ते तव पादांबुजभृंगाहित
संगाः भक्तास्तैः सह संगो येषां ते तेषां तत्संगतानामपि
सर्व ॥

रा॰ गी॰ ३

॥ऽहमिति हे प्रभो योगिभिर्ध्येयं भवापवर्गं संसारनिवर्तकं पदांबुजमहं प्रपन्नोऽस्मि ॥ अतो यथा येन प्रकारेणांजसाना

ऽहं प्रपन्नोऽस्मि पदांबुजं प्रभो भवापवर्गं तव योगिभावितं यथांजसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथानुशाधि मां ॥ ५ ॥

या सेनाज्ञानमेवापरवारिधिं मा अविद्यासमुद्रं सुखं यथा तरिष्यामि तथा मामनुशाधि शिक्षय ॥

श्री
२

श्रुत्वेति ॥ अथानंतरं माखिलं समग्रं सौमित्रिवचः ॥ श्रुत्वा प्र
पन्नपीडाहार्ता प्रसन्नबुद्धिरामः ॥ अज्ञानतमोपशंतये अ
विद्यांधकारनाशाय ॥

श्रुत्वापि सौमित्रिवचोखिलं तदा प्राह प्रपन्नार्तिहरः प्रसन्न
धीः ॥ विज्ञानमज्ञानतमोपशांतये श्रुति प्रपन्नं क्षितिपालभू
षणः ॥ ६ ॥

श्रुत्वेति प्रपन्नं वेदोक्तं राज्ञा भूषणा विज्ञानं माह ॥ ब्रह्मवि
द्याया पूर्वं नपेषु स्थिरत्वात् ज्ञानस्य नृपभूषणमिति
भावः ॥

आदौ गुरूपसत्तिमाह ॥ रामः आदाविति ॥ प्रथमं स्ववर्णाश्रम
वर्णिताः ॥ आश्रमोचिताः क्रियाः कृत्वा निष्कामकर्मानुष्ठा
नेनासादितं प्राप्तमभ्युद्धमानसं यस्येदृशः ॥

श्रीराम उवाच ॥ आदौ स्ववर्णाश्रमवर्णिताः क्रियां कृत्वा समा
सादितशुद्धमानसः ॥ समाप्य तत्पूर्वमुपात्तसाधनः समा
श्रयेत्सद्गुरुमात्मलब्धये ॥ ७ ॥

तत्पूर्वं समाप्य क्रियातो निवृत्तोपात्तसाधनो ॥ गृहीतवैरा
ग्यः सन् ॥ आत्मलब्धये आत्मज्ञानाय सद्गुरुमाश्रयेत् ॥

क्रियाइति॥ क्रियायज्ञादिका: शरीरोत्पत्तिहेतु:॥ शाहृताय
त: सुखगिणोरागद्वेषयुक्तस्यतौप्रियाप्रियौभवत:॥ यत्रध

क्रियाशरीरोद्भवहेतुराहृताप्रियाप्रियौतौभवत: सुरागिण:॥
धर्मेतरौतत्रपुन: शरीरकं पुन: क्रियाश्चक्रवदीर्यतेभव:॥ ८

र्मेतरौपुण्यपापेतत्रपुन: शरीरकं॥ पुन: क्रियाश्चभवंति
एवंभव: संसार: चक्रवत् ईर्यतेप्रर्यतेचक्रवत्संसार: प्रव
र्ततइत्यर्थ:॥ ८॥

ऽज्ञानमिति॥ हियस्मात यस्य संसारस्य ऽज्ञानमेव मूलकार
णं॥ ऽतो ऽत्र विधौ ब्रह्मज्ञानविधौ तद्ध्यानं तस्य त्यागो विधीयते

ऽज्ञानमेवास्याहि मूलकारणं तद्ध्यानमेवात्र विधौ विधीयते॥
विद्यैव तन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितं॥ १॥

तन्नाशविधौ अज्ञाननाशविधौ॥ विद्यैव पटीयसी॥ उत्तमसम
र्थो न तु कर्म तत्कर्मजन्मं फलं सा विरोधं विरोधसहितमीरितं
कथितं॥ विद्याकर्मणो विरोध इत्यर्थः॥ १॥

नाज्ञानेतिततः कर्मणः सकाशात् अज्ञानहानमाविद्यानाशो
नभवेत् रागसंक्षयोरागद्वेषनाशोपिनभवेत् किंतुसदोषंदो
षसहितं कर्मैवउद्भवेत् उत्पद्यते ततः सदोषकर्मणः काम्यक

नाज्ञानहानिर्नचरागसंक्षयोभवेत्ततः कर्मसदोषमुद्भवेत्
ततः पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्
भवेत ॥ १० ॥

र्मणः शकाशात संसृतिः संसारः ॥ अवारितानानिवारितुं
शक्यातस्मात्काम्यकर्मपरित्यज्यबुधोविवेकी ज्ञानविचार
वानभवेत्ज्ञानंविचारयेत् ॥ १० ॥

नान्विति ॥ ननु क्रियाकर्मवेदमुखेन चोदिता कथिता ॥ यावज्जीव मग्निहोत्रं जुहुयात् इत्यादिना पुरुषार्थस्य मोक्षस्य साधनं विद्या यथा वेदमुखेन चोदिता तथा कर्मापि किमर्थं निंद्यत

ननु क्रिया वेदमुखेन चोदिता यथैव विद्या पुरुषार्थसाधनं ॥ कर्तव्यता प्राणभृतः प्रचोदिता विद्यासहायत्वमुपैति सा पुनः ॥११॥

इति भाव ॥ संसं प्राणभृतो देहिनः कर्तव्यता प्रचोदिता कर्मा र्कं ॥ यतः पुनः ॥ सा क्रिया विद्यासहायत्वमुपैति ॥११॥

निष्कामकर्मणः करणात्सिद्धिद्वारा विद्योत्पत्तिहेतुः इतिवे
देनोक्तं कर्मइति कर्माकृतौ कर्माकरणे श्रुतिर्वेदो दोषं जगौऽवा
च तस्मात्कर्माकरणे दोषश्रवणात्मुमुक्षुणा मोक्षमिच्छता

कर्माकृतौ दोषमपि श्रुतिर्जगौ तस्मात्सदा कार्यमिदं मुमुक्षुणा
नतु स्वतंत्रा ध्रुवकार्यकारिणी विद्या न किंचिन्मनसाप्यपेक्षते ॥ २ ॥

सदा नित्यं कर्म श्रुतिस्मृत्युक्तं कार्यमेवाविद्या उपासना स्वतं
त्रा कर्मानुपेक्षिणी सती ध्रुवकार्यकारिणी ध्रुवं नित्यं कार्यं
ब्रह्मज्ञानलक्षणं तत्कर्त्री न तु नैव तस्मान्निष्कामकर्मणः
करणाच्छुद्धिमापाद्या विद्या साधनीया तत्र सदाचारं प्रमाणय
ति चिन्मनसा चिन्मनासियस्मतेन ब्रह्मविदापि कर्म नापेक्षते ॥ ३ ॥

का

नसत्येति। नसत्यं कार्यं फलं स्वर्गादिकं यस्य ताहशोप्यध्वरो यागो
यद्वत्। सः अमत्कारकादीन् प्रकाशते प्रकाशयति ज्ञानं प्रति
साधनमुत्पादयति। विद्यातद्वदेवाविधितः प्रकाशयन्तिशोते:
ति नसत्यकार्योपि [illegible] यद्वदध्वरः प्रकाशते [illegible] पिकारकादिका। त्यान
न तथैवाविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये॥१२॥

कर्मभिरेवमुक्तये विशिष्यते मुमुक्षुणां अशेषं कर्मणाशाय
तिनकर्मत्यागात् तस्मात्तत्कार्यं॥१३॥

केचिदिति केचिद्धि सर्ववादिन इति वदंति यद्देहाभिमाना
क्रियाकर्म प्रवर्तते गताहंकृतिः गताऽहंकृतिर्यस्य स गता
हंकृतिस्तस्य षष्ठ्यर्थे सप्तमी गलितदेहाभिमानस्य विद्याप्रक

केचि द्वदंतीति वितर्कवादिनः [illegible] दृष्ट [illegible] विरोधकारणात् तदप्यस
देहाभिमानस्याभिवर्धते क्रियाविद्यागताहंकृतिनः प्रसिध्यति १४

र्षणासिध्यतीति तस्मात्कर्मस्य तत्काविद्यैवाभ्यसाति तदत्रदुष्टं
मप्युद्दं विरोधकारणात् विरोधलक्षणाद्धेतोः तस्मान्नि
ष्कामकर्मविनां तत्करणाप्युद्धेरभावादित्यर्थः ॥ १४ ॥

विशुद्धेति विशुद्धं यत् विज्ञानमनुभवः विरोचनं दीप्तिमत्तदनु
चिंताभवयुक्ताःप्रात्मवृत्तिरात्मविषयिण्याविद्या साचरमा
ःप्रतिमाफलभूतेतिभण्यते उच्यते विद्वद्भिः रितिशेषः

विशुद्धविज्ञानविरोचनांचिताविद्यात्मवृत्तिश्चरमेतिभण्यते
उदेतिकर्माखिलकारकादिभिर्निहंतिविद्याखिलकारकादिकं १५

तत्कर्मसर्वकारकादिभिः सहोदेतिकाम्यकर्मादिभिः सहो
देतिसुपपद्यते विद्यातुःखिलकारकादिकं सर्वकारकव्य
वहारोच्छेदं ॥

सर्वकारकमवहारोछेदंकरोति ॥ तस्मादिति तस्मात्सुधीरशे
षतः ॥ सर्वकार्यंकर्मसजेत् ॥ अंतकरणशुद्धोसत्यामित्यर्थः
विद्यया सहकर्मणो विरोधात् विद्याकर्मणोर्समुच्चयोनभ

तस्मात्सजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयो
भवेत् ॥ आत्मानुसंधानपरायणः सदानिवृत्तसर्वेंद्रियवृ
त्तिगोचरः ॥ १६ ॥

वेत् ॥ जातायांविद्यायामात्मनुसंधानपरायणः ॥ आत्मा
ज्ञानपरोभवेत् ॥ तथानिवृत्ताः सर्वेंद्रियवृत्तिगोचराः विष
याः यस्येदृशश्च भवेत् इंद्रियाणिनिर्जित्यात्मानमनुसं
दधातित्यर्थः ॥ १६ ॥

यावदिति तदेवाविषदयतिमायययाकृत्वा यावत्न शरीरादि
षु ऽनात्मसु ऽात्मबुद्धिर्भवेत् तावद्विधिवादकर्मणां वेदो
क्तकर्मणां विधिरेव ऽवश्यं कर्तव्य इत्यर्थः ऽथ परात्मानं

यावच्छरीरादिषु माययात्मधीस्तावद्विधेयो विधिवादक
र्मणां नेतीतिवाक्यैरखिलं निषिध्य तज्ज्ञात्वा परात्मानमथ
त्यजेत् क्रियाः ॥१७॥

ब्रह्मज्ञात्वात्मत्वेनाविदित्वा नेतीतिवाक्यैः नेह नानास्ति किं
चनेति श्रुतिवाक्यैः अखिलं सर्वं निषिध्य तिरस्कृत्य क्रिया
वेदोक्ताः त्यजेत् ॥१७॥

सिद्धसाध्यस्यसाधनानपेक्षत्वादितिभावः ॥ यदेति ॥ यदाप
रमात्मात्मनोर्भत्मजीवयोर्भेदस्तद्भेदकं तन्नाशकं विज्ञानं

यदापरात्मात्मविभेदभेदकं विज्ञानमात्मन्यवभातिभास्व
रं ॥ तदैवमायाप्रविलीयतेंजसासकारकाकारणमात्मसंसृ
तेः ॥ १८ ॥

विशिष्टज्ञानं भास्वरं प्रकाशकमात्मनिचित्तेवभातिप्रका
शते ॥ तदैव आत्मनः संसृतेः कारणमज्ञानं ॥ सकारकं समा
पारं मायाशब्दवाच्यं मंजसा ॥ साक्षात्प्रविलीयतेनश्यति १८ ॥

श्रुतेति॥ कार्यस्यसंसारलक्षणस्यकारिणीकथंश्रपीसाऽप
विद्याश्रुतिप्रमाणैर्महावाक्यैर्नाशितासतीकथंभविष्यती

श्रुतिप्रमाणैरपिनाशिताचसाकथंभविष्यत्यपिकार्यका
रिणी॥ विज्ञानमात्रादमलाद्वितीयात्तस्मादविद्यानपुनर्भ ला॥
विष्यति॥१९॥

नभविष्यत्येव तस्मादमलाद्वितीयात्ऽप्रमलंनिर्मलंयद
द्वितीयंब्रह्म॥ तस्मात्विज्ञानमात्रात्विशेषेणज्ञानात
ऽविद्यापुनर्नभविष्यत्येव॥१९॥

यदेति। यस्यजातोयदा॥ अविद्यानष्टातदापुनर्नप्रसूयतेनोत्प द्यतेएवततोहमस्यकर्तातिमातिःकथंभवेन्नवेभवेव॥

यदाप्रनष्टानपुनःप्रसूयतेकर्ताहमस्यातिमातिःकथंभवेत्‌ तस्मात्स्वतंत्रानकिमप्यपेक्षतेविद्याविमोक्षायविभातिकेवलः॥ २०॥

तस्मात्स्वतंत्राब्रह्मविद्याविमोक्षायकिमपिनापेक्षते एकलास्यैवविभाति॥ आविद्यातुनास्त्येवेत्यर्थः॥ २०॥

सोतिसाप्रसिद्धातैतरीश्रुतिः॥ सादरंयथातथाप्रशस्ताखिलकर्मणांप्रशस्तानिया॥ अखिलकर्माणिनित्यनैमित्यकानितेषांन्यासमेवाह॥ वाजिनांश्रुतिः॥ सांगवेदोपानिषदपिएतावत्॥

सातैत्तिरीयश्रुतिराह॥ सादरंन्यासंप्रशस्ताखिलकर्मणांस्फुटं
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनं॥२१॥

इदमेवहविमोक्षाय॥ ज्ञानमेवसाधनं॥ नकर्मणानप्रजयानसायेन॥ ज्ञानेनैकेनअमृतत्वमानशुरितिश्रुतेः॥२१॥

विधेति त्वयाऽक्रतुर्विद्यासमत्वेन दर्शितः कर्मणोपि मुक्तिरं
तःकरणशुद्धिद्वाराविद्यायापीति संदृष्टांतः कुतोविद्यया
सह दृष्टांतसमस्तुल्यउदाहृतेनकथितः ॥ तत्र हेतुः फलैः पृ

विद्यासमत्वेनतुदर्शितस्त्वयाक्रतुर्नदृष्टांतउदाहृतः समः॥
फलैः पृथक्त्वाद्बहुकारकैः क्रतुः संसाध्यतेज्ञानमतोविपर्ययं ॥२२॥

थक्त्वात फलभेदात् हेतोः फलं स्वर्गं विद्याफलं मुक्तिरिति
फलभेदात् किंचाबहुकारकैः क्रतुः संसाध्यते अतोपर्ययो
ज्ञानं तत्र कारकापेक्षाभावात् ॥२२॥

रा·गी·
१२

सक्ताति ॥ अहमितियत्र देहे धीः देहे बुद्धिर्यस्य स प्रसवायः प्र
सिद्धस्तस्यैस्यर्थः सप्रसवायः तत्वदर्शिनभवति ॥ विधानतो
वेदोक्तविधानेनकर्मविधिप्रकाशितं कर्मविधौ प्रकाशितं क
र्मकांडरूपमत्यानं बुधैस्तस्मात्याज्यमेव ॥ कीदृशैः बुधैः अवि

स

सप्रसवायो [illegible] हमित्यनात्मधीर्यस्य प्रसिद्धा न तु तत्वदर्शिनं
तस्मात् बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतः कर्मविधिप्र
काशितं ॥२३॥

क्रियात्मानि ॥ अविक्रियो विक्रियारहितः आत्मा मनो येषां
ते अविक्रियात्मानस्ते शुद्धचित्तैरित्यर्थः ॥ आत्मजीवयोरै
कात्म्यं विज्ञाय ॥ मेरुदिशाप्रकाम्यतः काम्यरहितः स्थितमनसु

सोभवेत् ब्रह्माहमस्मीति विज्ञानात्
सुखी स्यात् किं नु तत्ः ॥२५॥

श्रद्धान्वितः॥ तथा गुरोः प्रसादात्॥ तत्वमसीति वा महावाक्यतस्तदर्थज्ञानात् शुद्धमानसः॥ निर्मलांतःकरणगुरुमु

श्रद्धान्वितस्तत्वमसीति वाक्यतो गुरोः प्रसादादपि शुद्धमानसः॥ विज्ञाय चैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकंपनः॥२४॥

पास्य तदुपदिष्टमहावाक्यार्थज्ञानाच्छुद्धांतःकरणे जीवयोर्ब्रह्मात्म्यैवाक्यज्ञानात्कृतार्थो भवतीत्यर्थः॥२४॥

॥अन्वा॥पदाविति॥ वाक्यार्थस्य तत्वमसीति वाक्यार्थस्य विधो
ज्ञानप्रकारे विधानतो विधिवत्॥ पदौ पदार्थावगतिः कारणं
पदानां तत्वं॥ असीति त्रयाणां पदानामर्थज्ञानाधीनत्वादिति

॥आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधा
नतः॥ तत्वंपदार्थौ परमात्मजीव[illegible]ाव सीति चैकात्म्य
मथानयोर्भवेत्॥ २५॥

भावः॥ एतः पदत्रयार्थानुकथयाति तत्वपदार्थौ परमात्म
जीवकौ तत्पदार्थः परमात्मा त्वंपदार्थो जीवः॥ अनयोस्तत्वं
पदार्थयोर्जीवात्मपरमात्मनोः॥ ऐक्यात्मकत्वं॥ असीति पदस्या

एवंपदार्थमुक्त्वावाक्यार्थमाह ॥ प्रत्यगिति ॥ तत्शब्दः परोक्ष
वाचित्वंशब्दः प्रत्यक्षवाचितयोरात्मनोः ॥ जीवात्मपरमा
त्मनोप्रत्यक्परोक्षादिविरोधंजीवः ॥ प्रत्यक्षोदुःखशोकप्रभु
प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदा
त्मतां ॥ संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मनम
थाद्वयोभवेत् ॥ २५ ॥

त्वाद्यन्वितः परमात्मापरोक्षः सुखित्वादिविरोधंविहाय
सत्काचिदात्मतांचैतन्यरूपतामेकधर्मसंगत्यलक्षणया
जहल्लक्षणयाशोधितांज्ञात्वास्वंस्वंजीवात्मनंब्रह्मज्ञात्वा
ःपद्वयोद्वैताब्रह्मरूपोभवेत् ॥ २६ ॥

एकात्मेति। एकात्मकत्वाज्जीवात्मनोरेकत्वात् जहल्लक्षणागं
गायां घोष इतिवन्न संभवेत्। सा तु भेदे सति भवेत् तथाऽजह
ल्लक्षणया शोणो धावतीत्यादिकयापि विरोधतोऽविरोधात्
ऽजहल्लक्षणापि न संभवेदिति शेषः यथाविरोधत इति प्र
थमार्थे तत् ऽजहल्लक्षणयापि विरोधो भवति तस्मात्त्वंप
एकात्मकत्वाज्जहतीन संभवेत् तथाजहल्लक्षणयाविरोधतः॥
सोऽयं पदार्थाविव भागलक्षणा युज्येत तत्त्वंपदयोरदोषतः २७॥
दयोरदोषात् दोषाभावात् भागलक्षणया जहल्लक्षणया युज्ये
त युक्ता भवेत् कालविशिष्टत्वे नैतत्कालविशिष्टत्वलक्षणे
भागलक्षणा तदुभयं परित्यज्य देवदत्तमात्रे ऐक्यं एवं तत्त्वंपद
योः परोक्षत्वापरोक्षत्वे विहाय चैतन्ये फलत्वे विरोधाभावो विज्ञेयः॥

॥आत्मनउपाधिमाह॥ रसादिति॥ पार्थ॥ प्रनाद्यज्ञानजनितं
स्थूलं शरीरमात्मनउपाधिः कीदृशं शरीरं रसादिकं पंचीकृत
भूतसंभवं रसाद्विश्वभरेश्वरमः रसादीनि पृथिव्यादीनि या
नि पंचीकृतानि भूतानि स्थूलानि भूतानि तेभ्यः॥ संभवः उत्प
त्तिर्यस्य तत्पंचीकृतं पंचभूतोत्पन्नमित्यर्थः॥ तदा दुःखसुखादि
रसादिपंचीकृतभूतसंभवं भोगालयं दुःखसुखादिकर्मणां॥
शरीरमाद्यं [illegible] दिकर्मजं मायामयं स्थूलमुपाधिं [illegible] २
कर्मणां दुःखसुखयोरादिभूतानि कारणभूतानि यानि कर्मा
णि पापपुण्यानि तेषां भोगालयं भोगाधिष्ठानं पापपुण्यफल
भोगकर्तृ इत्यर्थः॥ तथा दुरितादिनि कर्मजं पापपुण्योत्पाद
कानि कर्माणि परदारसेवनादीनि गंगास्नानादीनि च तेभ्यो

तवद्दा

सूक्ष्ममिति॥ सूक्ष्मंमनः॥ बुद्धिरहंक्रियाऽहंकारइंद्रियैःबु
द्धिरिंद्रियैःकर्मेंद्रियैःप्राणैः॥ प्राणादिपंचवायुभिसहापं
चीकृतभूतसंभवंऽपंचीकृतभूतेभ्योभूतेभ्यःउत्पन्नंशरीरंसु

सूक्ष्मंमनोबुद्धिरहंक्रियेंद्रियैःप्राणैरपंचीकृतभूतसंभवं॥
भोक्तृसुखादेरपिसाधनंभवेतशरीरममाद्विदुरात्मनोबुधाः॥२०॥

खादेःसुखदुःखशोकमहादीनभोक्तसाधनंभवेत॥ परंतुबु
धास्तच्छरीरंपरमात्मनःसकाशात्दन्यत॥ पृथक्विदुर्जानं
तिशरीरमात्मनोतिभिन्नमित्यर्थः॥२१॥

अनादीति॥ आदिरहितं॥ अनिर्वाच्यं वक्तुं अशक्यं मायाप्रधानं
अज्ञानोत्पन्नं परमं सूक्ष्मं शरीरकं सूक्ष्मं शरीरं लिंगशरीर
शरीरं षोडशावयवं कारणं संसारस्य हेतुभूतं इह जानीहि

अनाद्यनिर्वाच्यमपीह कारणं मायाप्रधानं तु परं शरीरकं॥
उपाधिभेदात्तु यतः पृथक् स्थितं स्वात्मानमात्मन्यवधारये
त् क्रमात्॥ ३०॥

येगसार्थास्तेज्ञातार्थः॥ उपाधिभेदात्तु आत्मनि शरीरे द्वि
धं पृथक् स्थितं स्वात्मानं क्रमात् शनैः॥ शनैरवधारयेत् नि
श्चितुयात्॥ ३०॥

रा॰गी॰
१६

कोशोस्तीति कुतः पृथक्स्थितः आत्मेत्यत आह यतः कारणात् अयमजः अजन्मा असंगरूपः संगरहितः अद्वयो द्वैतरहितयापि पंचसु कोशेषु अन्नमयादिषु तत्तदाकृतिः कोशाकारवानु विभाति तत्र दृष्टांतः यथास्फाटिकोपलः स्फ

अयं
हम

कोशेषु पंचस्वपि तत्तदाकृतिर्विभाति संगात्स्फटिकोपलो यथा असंगरूपोयमजोद्वयो विज्ञायतेस्मिन्परितो विचारिते ॥ ३१ ॥

परि

टिकपाषाणनीलपीतादिसंबद्धवत्तदाकारो भाति तद्वत् अस्मिन्नशरीरे अभितः सर्वतोपि विचारितो विचारेण ला पूर्वीक्तो ज्ञायते तत्परे ॥ ३१ ॥

शिव
१६

बुद्धेरिति गुणत्रयात्मकेन त्रिगुणात्मिकाया बुद्धेः स्वप्नादि
भेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन देहसंसारस्त्रिविधा वृत्तिर्व्या
पारो दृश्यते केवलो ऽविवेकस्याकारिणि परे ऽखण्डे ब्रह्मणि

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादिभेदेन गुणत्रयात्मनः ॥
अन्योन्यतो ऽस्मिन् व्यभिचारतो मृषा नित्ये परे ब्रह्मणि केव
ले शिवे ॥ ३२ ॥

नित्येवस्थात्रये ऽपि समानो वर्तमाने साक्षि ॥ अस्मिन्नवस्था
त्रयेवरण अन्योन्यतो व्यभिचारतः ॥ आत्मनस्तु अवस्था
त्रये ऽपि भासमानत्वादात्मैव सत्यो ऽवस्थात्रये ऽपि सर्वः
यो ऽहं जाग्रदवस्थायां विषयानन्वयः ॥ ३२ ॥

रा॰गी॰
१७

भवंस्वप्नेनानास्वप्नानपश्यंसुषुप्तौसुखमहस्वाप्संसपुनरपि
दानींजागमीसात्मानुभावात्॥ऽप्रजस्त्वान्निरंतरादेहादिभूता
देहेंद्रियप्राणमनोबुद्धिरात्मनांसंधान देहादिसमुहानसंगा

धार

देहेंद्रियप्राणमनोबुद्धिरात्मनांसं[illegible]जस्वं[illegible]परिवर्ततेधियः॥
वृत्तिस्तमोमूलतयास्तलक्षणायावत्प्रवेत्तावदसौभवोद्भवः॥३२॥

वापाठः॥धियोबुद्धेवृत्तिःपरिवर्ततेमोहेतुकतयाअस्थूल
क्षणा॥अज्ञानरूपान्ऽप्रसौधिवृत्तिःयावत्भवेत्॥ऽप्रत्रोवं
समग्रंजगत्सृजेत्॥३३॥

न

शिव
१७

कीदृशः नेतिप्रमाणेन नेति नेतिसुपनिषद्वाक्येन निराकृतं
ऽखिलं विश्वं येन एतोदृदाचितेन ॥ समास्वादितं सम्यगनु
भूतं चिद्घनामृतं चैतन्यं घनरूपं ब्रह्म येन सः ॥ कीदृशं जग
तः पात्तसद्रसं पात्तो गृहीतस्तस्य विश्वस्य रसस्सारो येन स

नेतिप्रमाणेनानिराकृताखिलो हृदा समास्वादितचिद्घना
मृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथांभः प्रजहाति तत्
फलं ॥ ३४ ॥

घनरूपः ॥ सर्वं यस्य स सर्वं खल्विदं ब्रह्मेति ऽनुभवात् तत्र
दृष्टांतः ॥ यथा ऽंभो रसं पीत्वा तत्फलं आम्रादिकं परसं प्र
जहाति नो त्यजति ॥ ३४ ॥

कदाचिदिति ॥ आत्मा कदाचिन्नमृतः ॥ नजायते नउत्पद्यते नक्षीय
ते नक्षीणोभवति नापी विवर्द्धते वार्द्धिनयातिः ॥ यतोमरः नित्यं
यथानिरस्तसर्वातिशयः ॥ नीरस्ताहूरीकृतासर्वे ऽतीशयायेनसं
र्वातिशायी सर्वोत्कृष्टइत्यर्थः ॥ सुखात्मकः सुखरूपः स्वयंप्रभः

कदाचिदात्मानम्रतो नजायते नक्षीयते नापि विवर्द्धते न च
निरस्तसर्वातिशयः सुखात्मकः स्वयंप्रभुः सर्वगतोयमद्वयः ३५ ॥

स्वमेवदीप्यमानः ॥ यस्यभासासर्वमिदंविभातीतिश्रुतेः ॥ सर्व
गतः सर्वांतर्यामि ॥ ऽतएवाद्वयो द्वैतरहितः ॥ ऽयमात्माह
मित्यर्थः ॥ ३५ ॥

एवंविधे पूर्वश्लोकोक्तलक्षणलक्षिते ज्ञानमये ज्ञानरूपे सुखा
त्मके सुखरूपे ऽऽत्मनि दिवसमयो भावः संसारः कथं प्रतीयते
भासते का उत्रयेण्यात्मनि संसारो नास्तीत्यर्थः ॥ परंतु अद
ष्टवशाद नादिवासना वशात् अज्ञानतः प्रकाशते ॥ ज्ञाने आत्म
ज्ञाने सति क्षणात् तत्क्षणमेव विलीयते नश्यति कस्माद्विरो

ज्ञाने विली
यते

एवंविधे ज्ञानमये सुखात्मके कथं भवो दुःखमयः प्रतीयते
अज्ञानतोध्यासवशात् प्रकाशते विलीयते वि राधतः क्षणात् ३
धतः ज्ञानयोर्विरोधात् ॥ ज्योतिस्तमसोरिव यथादित्यभास्करे ॥
तमो विलीयते एवमात्मज्ञाने जाते संसारो विलीयते इत्यर्थः ॥ ३ ॥

यदृश्यादिति ॥ भ्रमात्मोहादन्यत्रवस्तुनियत्ऽप्रमेद्धाविभाव्यतेकल्प्य
तेविपश्चितोबुधाःऽप्रमुमध्यासनादिकथयाति ॥ भ्रमस्त्रदृष्टांतः

यदन्यदन्यत्रविभाव्यतेभ्रमादध्यासमित्याहुरमुंविपश्चितः ॥
ऽसर्पभूतेहिविभावनंयथारज्वादिकेतद्वदपीश्वरेजगत् ॥३७॥

यथाऽप्रसर्पभूतेरज्वादिकेहिविभावनंसर्वकल्पनंतद्वत्ई
श्वरेजगत्कल्पितंरज्जौसर्पकल्पनावदीश्वरेविम्बकल्पावि
कल्पेति ॥३७॥

मायारहितोनिर्मायेचिदात्मकेचिद्रूपंप्रथमं ॥ एष ःऽहंकारः ॥ प्रकल्पितः निरामयेनिरंजनेकेवलेपरेऽत्कृष्टेब्रह्मणिब्रह्म

विकल्पमायारहितेच्चिदात्मकेहंकारएषः प्रथमःप्रकल्पितः ॥ ऽध्यासएवात्मानिसर्वकारणेनिरामयेब्रह्मणिकेवले परे ॥ ३८ ॥

स्वरूपेऽात्मनिऽध्यास्तेहंकारनतितएवसर्वस्यजगतो ॥ तस्मात्मुमुक्षूणांहंकारस्त्याज ः ॥ ३८ ॥

इच्छेति ॥ परे ब्रह्मणि इच्छादिधर्मकाः रागादिधर्मका सुखादिधर्मकाश्चाधियो बुद्धयः कल्पिताः ॥ संसृतिहेतवः संसारकारणानि भवंति ॥

८॥ इच्छादिरागादिसुखादिधर्मिकाः सदा धियः संसृतिहेतवः परे ॥ यस्मात्प्रसुप्तौ तदभावतः परः सुखस्वरूपेण विभाव्यते हि नः ॥ ३१ ॥

यस्माद्धेतोः सुषुप्तौ सुषुप्त्यवस्थायां तदभावतः सुखेच्छाद्यभावात सुखस्वरूपेण वनोस्माकं परः आत्मा विभाव्यते प्रतीयते सुखमेवाप्स्यामी ॥ ३१ ॥

ऽनादिति ऽनादिर्या ऽविद्या तदुद्भवा ऽविद्योत्पन्ना या बुद्धि स्तत्र प्रतिबिंबितो याऽप्येत : चैतन्यस्य प्रकाश : ऽयं जीव : शतिर्यते ऽपा स्मानुधीयो बुद्धे : ॥

ऽनाद्यविद्योद्भवबुद्धि बिंबितो जीव : प्रकाशो यमिती र्यते चित : ऽत्माधिय : साक्षितया पृथक् स्थितो बुध्या परिच्छिन्न परः स एव हि ४० ॥

साक्षीतया पृथक् स्थित : एवं बुध्या परिच्छिन्न पर : ऽत्मा येन ईदृश : ॥ ४० ॥

चिदिति चिदात्मचेतसो चिद्रूपस्यात्मनश्चितस्य वाऽस्मोमंपुर
स्यरं मंधायवशात् जडाजडत्वं चिज्जडत्वसंयोगः प्रतीयते कस्मा
त् चिद्बिंबसाक्षात्मधीयां प्रसंगतः चित् चैतमस्या बिंब प्रतीबिं
बसीत्रासावात्मा धीबुद्धिस्तासां प्रसंगात् संबधात् तत्र दृष्टांतः

चिद्बिंबसाक्षात्मधियां प्रसंगतः स्वेकत्रवासादनलाक्तलोह
वत् ॥ अस्मोममधीवशात् प्रतीयते जडाजडत्वं च चिदात्मचेत
सोः ॥ ४१ ॥

अनलाक्तलोहवत् अनलेन अक्तं तप्तं लोहं तद्वत् यथा अन
लोहयोरेकत्रवासात् ऐक्यं प्रतीयते लोहं तद्वदात्माधीप्रती
बिंबसंयोगाद्दहातिभातिप्रतीयते ॥ ४१ ॥

गुरोरिति ॥ गुरोः सकाशात् वेदवाक्यतोपि गुरूपदेशात् ॥ तत्त्वमसी
त्यादिमहावाक्यविचारतोपि संजातो विद्यानुभवो यस्य तादृशः
संतं तं प्रसिद्धं स्वात्मानं स्वात्मस्वरूपे मात्मस्थं शरीरस्थमुपाधि

गुरोः सकाशादपि वेदवाक्यतः संजातविद्यानुभवो निरीक्ष्य तं
स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरं ४८

वर्ज्जितं निरुपाधिं निरीक्ष्य दृष्ट्वा आत्मगोचरं आत्मविषयेभा
समानं मशेषं जडं देहेंद्रियात्मकं त्यजेत् सर्वं मिथ्येति जानीयात्
॥ ४८ ॥

रा॰गी॰
२२

आत्मदर्शनप्रकारमाह प्रकाशेति एवंविधोहमितिभावयेत्॥ कीदृशः प्रकाशः रूपं यस्य सः प्रकटरूपः अजः अजन्मा अद्वयः द्वितीयरहितः सद्रूपद्विभातः एकदेसर्वत्रभासमानः अतीवातिमेळ: शुद्धः विशुद्धः विज्ञानम: शुद्धज्ञानस्वरूपः निरामयो निर्विकारः संपूर्णो व्यापकः पूर्णमदः पूर्णमिदमितिश्रुतेः

प्रकाशरूपोहमजोहमद्वयो सद्रूपद्विभातोहमतीवानिमेळः वि शुद्धविज्ञानमयोनिरामयः संपूर्णआनंदमयोहमक्रियः ४७॥

आनंदमयः आनंदस्वरूपः अविक्रियः क्रियारहितः एवंविधोहंनसंसारी ४७

शिव
२२

सदैवेति॥ पुनरेवंविधोहमितिसर्वदाभावयेत्॥ कीदृशः सदैवमु
क्तः नकदापिबद्धः॥ अचिंत्यशक्तिमानभा॥ नु अचिंत्याशक्तियस्यसतथा
तथा अतींद्रियज्ञानंइंद्रियातीतंयत्ज्ञानतद्रूपः अविक्रियात्मकः
नविद्यतेविक्रिया॥ विकारोयस्यसोविक्रियः॥ ईदृशः आत्मस्वभा
वोयस्यसनिर्विकारः॥ षड्भावविकारःभूस्मइत्यर्थः॥ अनंतपारः

सदैवमुक्तोहमचिंत्यशक्तिमानतींद्रियज्ञानमविक्रियात्मकः॥
अनंतपारोहमहर्निशंबुधैर्विभावितोहंहृदिवेद[illegible]॥ ४४॥ वादिभि:

नविद्यते अतः कालतः यद्देषकालपरिछिन्नछेदस्मइत्यर्थः॥
अहर्निशंमहोरात्रंवेदाविज्ञैरुपनिषदर्थविद्भिर्बुधैर्ज्ञानिभि
र्हृदिचित्तेभावितः आत्मत्वेनाचिंतितः॥ ४४॥

एवमिति ॥ एवंम्श्लोकद्वयेनोक्तप्रकारेणाखंडितात्मनाऽखंडस्व
रूपेणात्मानं स्वस्वरूपं विभाव्यमानस्य विभावयमानस्य चिंत
यतः कर्तरि यक् प्रत्ययः ॥ इह स्यास्य पुंसो या विष्णुब्रह्मभावना ब्रह्मा

एवं सदात्मानमखंडितात्मना विभाव्यमानस्य विष्णुब्रह्मभावना
हम्मादविद्यामचिरेण कारकैः रसायनं यद्वदुपासितं रजः ॥ ४५ ॥

हमिति भावनाऽचिरेणाल्पस्य कालेनैवाविद्याहमात् ॥ तत्र
दृष्टांतः ॥ यथा कारकैः क्रियाकुशलैः रजोरोगाद्युपासितं उक्तो
पासनायाः साधनमाह ॥ ४५ ॥

विविक्तेति ॥ विविक्ते विजने एकांते आसिनः सनडुपारतानि वि
निर्जितानि इंद्रियाणि यस्य सः विनिर्जितः आत्मा चित्तं येन
सः विमलांतराशयः विमलानि पापांतकरणवृत्तिर्यस्य सः

विविक्तः आसीनउपारतेंद्रियो विनिर्जितात्मा विमलांतराशयः
विभावयेदेकमनन्यसाधनो विज्ञानदृक्केवलमात्मसंस्थितः ४६

अनन्यसाधनः अनन्यतुष्टिं निरोधातिरिक्तं साधनं यस्य सः
विज्ञानदृक् विज्ञाने अनुभवे दृक् ज्ञानं यस्य सः केवलमात्म
नि परमात्मनि स्थितः तद्रूप इत्यर्थः ॥ औषधं जैरोगं हन्या
त् ४६ ॥

विश्वमिति ॥ यदेतत् विश्वं जगत्सर्वकारणे जगद्धेतौ आत्मनि स्व
स्वरूपे विलापयेत् ॥ कीदृशं विश्वं परमात्मदर्शने परमात्मेति
दर्शनं यस्य परमात्मस्वरूपं ततश्चिदानंदमयाश्चिद्रूपः ॥ आ

विश्वं यदेतत्परमात्मदर्शनं विलापयेद् आत्मनि सर्वकारणे
पूर्णश्चिदानंदमयो वातिष्ठते न वेद बाह्यं न्न च किंचिदांतरं ॥ ४७ ॥

नंदस्वरूपः पूर्णो वातिष्ठते ततो बाह्यं शरीरं बहिर्भूतं अंतरं शरी
रांतर्गतं च किंचिदपि न वेद न जानामि ॥ ४७ ॥

पूर्वमिति। समाधेः पूर्वं समाधिप्राप्तेः प्राक्स्थचराचरं स्थावरजं
गमात्मकं जगदोंकारमात्रं विचिंतयेत्। हि यतः प्रणवो वाचको
विभाव्यतेऽच्यते तदेव ब्रह्म वाच्यं वस्तुतोयं वाच्यवाचकभेदो

पूर्वं समाधेरखिलं विचिंतयेदोंकारमात्रं सचराचरं जगत्॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यतेऽज्ञानवशान्न बोधतः॥४८॥

अज्ञानवशात् न बोधतः ज्ञानतः प्रबोधे सति वाच्यवाचकत्वा
भावाद्ब्रह्मैव सर्वमिति भावः॥४८॥

समाधेः पूर्वमवस्थात्रयामाह ॥ अकारोति ॥ विश्वकोजाजाग्रदव
स्थाभिमानी अकारसंज्ञकः पुरुषोहि तैजस्कः तैजसः स्वप्ना
वस्थाभिमानीउकारसंज्ञकः क्रमात्ज्ञेयः प्राज्ञः सुषुप्त्याव

अकारसंज्ञः पुरुषोहिविश्वकोह्युकारतैजस्कईतीर्यतेक्रमात्
प्राज्ञोमकारः परिपठ्यतेखिलैः समाधिपूर्वंनतुतत्वतोभवेत् ॥ ४९ ॥

स्थाभिमानी ॥ अखिलैसमग्रैर्विद्भिर्मकारः दृश्यतेएतदवस्था
त्रयंसमाधेः ॥ ४९ ॥

ह्युकारकस्तैजसं सू॰ ८२

पूर्वमेवनतत्वतः तत्वं विश्वमिति विश्वं जाग्रदवस्थाभिमानी
नं पुरुषमकारं तत्संज्ञं बहुधाव्यवस्थितं उकारमध्ये उकारसं
ज्ञे तैजसे विलापयेत् ॥ ततस्तैजसं स्वप्नावस्थाभिमानीनं उका

विश्वं त्वकारं पुरुषं विलापये दुकारमध्ये बहुधाव्यवस्थितं
ततो मकारे प्रविलाप्य तैजसं द्वितीयवर्णं प्रणवस्यांतिमे ५०॥

रं मकारे प्राज्ञे विलापयेत् ॥ प्रणवस्य द्वितीयवर्णं उकार
संज्ञं तैजसं प्रणवस्यांतिम मकारे प्राज्ञे प्रविलापयेत् ॥५०॥

रा॰गी॰
२६

मकारमिति मकारं मकारसंज्ञं प्राज्ञं सुषुप्त्यवस्थाभिमानी नं कारणेजगद्धेतौ परे उत्कृष्टेचित्तनौ चिद्रूपेआत्मनि विलापयेत तस्मिन्लीनेवस्थात्रयेयत्परं ब्रह्मसोहं विमुक्तवत्वास्तवमुक्तेरभावात विज्ञानदृक्‌विशिष्टज्ञानेरूपमात्मानपश्यती

५२

मकारमप्यात्मानिचित्तनौपरेविलापयेत्प्राज्ञमपीहकारणं सोहंपरंब्रह्मसदाविमुक्तंविज्ञानदृक्‌मुक्तउपाधितोमलः ५१

तिविज्ञानदृक्‌उपाधितोमुक्तः निर्गलिताभिमानत्वात अतएवनिर्मलः मायातीताहं उपाधिसंबंधएवात्मानोमलः ५१

शिव
२६

एवमिति : ॥ एवमुक्तप्रकारेणाविम्बादिनां विलापनेकृते ॥ आ
त्मासाक्षाविमुक्तोजीवमुक्तोभवेत ॥ जीवनमुक्तावस्थांविशे
षणवारेणाह ॥ कीदृश : परिज्ञानपरात्मभावन : परिज्ञाता
परमात्मनोब्रह्मस्वरूपेणाभवं : ॥ नास्वरूपंयेनस : जात : साक्षात्
कार : अतएवस्वानंदेनतुष्ट : अतएवपरितोविस्मतंमाखि

एवंपुरिज्ञातपरात्मभावन : स्वानंदतुष्ट : परिविस्मताखिल :
आत्मातुनित्यात्मसुखप्रकाशित : साक्षाद्विमुक्तोचलासिंधु
वारिवत ॥ ५२ ॥
ळंदेहादिकंयेनस : नित्यात्मस्वरूपप्रकाशित : नित्यसावेिना
सि : आत्मसुखंप्रकाशितंयेनस : प्रत्यक्ष आत्मत्वेनज्ञातोभवेत
अतएवासिंधुवारिवत्सतुरजलवत अचल : स्थिर : प्रगाधमा

एवमिति एवमुक्तप्रकारेण सदाभ्यस्तः समाधिर्येन हंसा
स्य योगिनो हं परमात्मा सद्रूपः प्रत्यक्ष आत्मत्वेन ज्ञातो भवे
त् किं हंसस्य योगिनः निवृत्तः सर्वेंद्रियगोचरस्य निवृत्ता सर्वे
द्रियगोचराः शब्दादयो विषया यस्य तस्य तथा विनिर्जिता

एवं समाभ्यस्तसमाधियोगिनो निवृत्तसर्वेंद्रिय[illegible]गोच
रस्य हि ॥ विनिर्जिताशेषरिपोरहं सदा दृश्यो भवेयं जितषट्
गुणात्मनः ॥५३॥

शेषरिपोः विजिताः अशेषाः समस्ता रिपवः क्रोधादयो
यस्य तस्य तथा जितषट्गुणात्मन जिताः षट्गुणाः क्षुधा
तृषा शोक मोह जरा मृत्यु लक्षणाः येन हंसः आत्मा अंतःक
रणं यस्य तस्य क्षमया पतस्य स्पर्थ ॥५३॥

ध्यात्वेति॥ एवमुक्तप्रकारेणात्मानमहर्निशंभिर्ध्यात्वासदाम
यियमवान्तिष्टेत्॥ कीदृशः मुक्तसमस्तबंधन॥ मुक्तानिस
मस्तानिबंधनानियेनसः पुत्रादिस्नेहरहितः॥ अभिमान

ध्यात्वैवमात्मानमहर्निशंमुनिस्तिष्ठेत्सदामुक्तसमस्तबंधनः॥
प्रारब्धमश्नास्यभिमानवर्जितोमय्येवसाक्षात्प्रविलीयतेततः ५४॥

वर्जिसहकेवलंप्रारब्धमश्नातिदेहपातंयावत्प्रारब्धकर्म
भुक्तेसपुमानततोमय्येवप्रविलीयते॥ ५४॥

ऽपादावितिऽपादेमध्येऽप्यंततोपिभवंसंसारंशोकहेतुकारणं
शोकहेतुभूतांविदित्वाज्ञात्वाविधिवादचोदितंश्रुतिवाक्योक्तं

ऽपादेचमध्येचतथैवचांततोभवंविदित्वाभयशोककारणं
हित्वासमस्तंविधिवादचोदितंभजेत्स्वमात्मानमथाखिला
त्मनां ५५

समस्तंऽर्थवादरूपंहित्वासक्ताऽखिलात्मनांसर्वात्मना
मात्मभूतंसंभजेत् परमात्मानमात्मत्वेनजानीयात् इत्यर्थः

ऽऽत्मनीति:॥ इदंविम्बंमात्मनिस्वरूपेऽभेदेनविभावयत्
ऐक्येनचिंतयन् ऽऽत्मनोजीवान् मयासहऽभेदेनजाना
तिसर्वमित्स्वरूपंपश्यतीत्यर्थः॥ तत्रदृष्टांतः यथावारिनिधौ
जलमभेदेनपश्यतियथाक्षीरेदुग्धेपयोभेदेनपश्यति॥ यथा

ऽऽत्मनमभेदेनविभावयंतिदंजानात्यभेदेनमयात्मनस्तदा॥
यथाजलंवारिनिधौयथापयः क्षीरेदुग्धेयथाव्योम्निनिलेयथानि
लः॥५६॥

व्योम्निवियत्घटाकाशादिकमभेदेनपश्यतियथा॥ ऽनि
लेवायोऽनिलंप्राणादिकंवायुमभेदेनपश्यतीतद्वत्॥ स
र्वंपरमात्मात्वेनपश्यतीत्यर्थः॥५६॥

इच्छुमिति लोकसंस्थितः संसारोस्थितोपि इत्थं पूर्वोक्तप्रकारेण यदिक्षेत तदाकृतार्थः स्यादिशेष किं कुर्वन् जगन्मृषा मिथ्यैवेति भावयन् चिंतयन् मुनिः मननशीलः कस्मान् रागान् मिथ्याश्रुतियुक्तिमानतः वेदे सर्वमिदं ब्रह्मेति प्रपंचो मिथ्या दृश्यत्वात् घटवदिति मानं देहस्याविरूपातात् तत्र तस्मान्न कर्तव्योतियुक्तिः

इद्धं युदीक्षेत हि लोकसंस्थितो जगन्मृषैवेति विभावयन् मुनिः निराकृतत्वात् श्रुतियुक्तिमानतो यथेंदुभेदो दिशिदिग्भ्रमादयः ॥५७॥

तत्र दृष्टांतः यथेंदुभेदात् यथा दृष्टिभेदात् द्वित्वं ज्ञायते प्रतीयते यथा दिशि दिग्भ्रमादयः पूर्वादिषु पश्चिमादिभ्रांतयो भवंति ते भ्रमा यथा मिथ्या एवं जगदर्पितभावः यदि इत्यर्थः ॥५७॥

यावदिति यावत्पर्यंतमखिलं विश्वं मदात्मकं मद्रूपं न पश्येत् ता
वन्मदाराधनतत्परो भवेत् ममाराधनं नित्यं कुर्यादित्यर्थः॥ की
दृशः श्रीकृष्णानुकंपावान् भक्तोऽत एवास्य ऊर्जितभक्तिलक्षणः

यावन्न पश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् श्र
द्धालुरत्यूर्जितभक्तिलक्षणो यस्तस्य दृश्योऽहमहर्निशं हृदि ५८

ऽत्यंतमूर्जितानि उत्कृष्टानि भक्तिलक्षणानि रोमांचाश्रुकं
पादीनि यस्य सः यथा विकारो नेत्रे जलं गात्ररुहेषु हर्षः इति
भागवतोक्तः एवंविधो यो भक्तस्तस्य हृदिऽहमनिशं महं दृश्यो भवेयं ५८

रहस्यमिति एवंश्रुतिसारांनिरूप्यानिगमयति हेलक्ष्मणश्रुति सारसंग्रहंश्रुतिसारउपनिषदस्तेषांसंग्रहंनिश्चित्य एतद्रह स्यंप्रियात्प्रियात्मनयातवोदितमुक्तंयेनरहस्यंसंसारबुद्धि

रहस्यमेतत्श्रुतिसारसंग्रहंमयाविनिश्चित्यतवोदितंप्रियात ॥ यस्त्वेतदालोच्यतीहबुद्धिमानसमुच्यतेपातकराशिभिःक्षणात ५१ ॥

मानसनएतनमदुक्तमालोचयतिसपुमानपातकराशिभिर्ब्र ह्महत्यादिपापसमूहैः क्षणेनतत्क्षणादेवमुच्यतेनिःपापो भवति ५१ ॥

भ्रांतश्चातिर्हि भ्रांतयतश्चेदं जगत्स्थावरजंगमात्मकं परिहृश्यते
तत्सर्वं मय्येव मिथ्याभूतमेवेति चेतसा परिहृत्य सत्कामज्ञाव
नाभावितशुद्धमानसः मज्ज्ञावनामयाममध्यानेन भावितं वा

भ्रांतयेदीदं परिहृश्यते जगन्मय्येव सर्वं परिहृत्य चेतसा मज्ञा
वनाभावितशुद्धमानसः सुखीभवानंदमयो निरामयः ॥ ६० ॥

सितं वासितमत एवं शुद्धं मानसमंतःकरणं यस्य सः अ
त एव निरामयो निर्मलः अत एवानंदमयः सन् सुखी भवेत् ॥ ६० ॥

यश्नाति ॥ यो नरो गुणातीतं भृद्ये तन्मं गुणात्परं सरूपारातीतं स
दापि हृदा मनसा मां सेवते यद्वा गुणात्मकं गुणितं रामं बु
ध्यादिगुणावतारं यः सेवते सोहमेव समदात्मकोभूत्वास्व

यस्सेवते मामगुणं गुणात्परं हृदा कदा वायदि वा गुणात्मकं
सोहं स्वपादां चितरेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा
रविः ॥ ६१ ॥

पादांचितरेणुभिः ॥ स्वपादसंलग्नपांशुभिर्लोकत्रितयं स्पृ
शन्पुनाति पवित्रयति तत्र दृष्टांतः यथा रविः स्वकिरणै
र्लोकत्रयं पुनाति तद्वत् ॥ ६१ ॥

विज्ञानमिति॥ एतद्रामगीताध्ययनफलमाह॥ वेदांतवेद्यचरणे
नवेदांतैरुपनिषद्भिर्वेद्यं यद्ब्रह्म तदेव सन्‌ रामरूपेण यश्चरव
तीति वेद्यश्चरणस्तेन मयैव गीतं॥ श्रुतिसारसंज्ञं वेदांतसारा
ख्यमेतत्‌॥ विज्ञानमखिलं समग्रं यः श्रद्धया परिपठेत्‌ नित्यं

विज्ञानमेतदखिलं श्रुतिसारसंज्ञं वेदांतवेद्यचरणेन मयैव
गीतं॥ यः श्रद्धया परिपठेत्‌ गुरुभक्तियुक्तो मय्येव सोमलमनाः
प्रविलीयते ते॥ ६२॥

पठति गुरुभक्तियुक्तः गुरौ प्रीतिमान्‌ यस्य देवे परा भक्तिः य
था देवे तथा गुरौ॥ ६२॥ छ॥ छ॥ समंत १८०८ ज्येष्ठवद्यत्रयोद
सी १३ हस्ताक्षर विष्णुराम मोसरज्ञाती बडनगरे ब्राह्मण॥

रा.गी.
३२

[OrderDescription]
,CREATED=11.10.19 13:39
,TRANSFERRED=2019/10/11 at 13:48:45
,PAGES=66
,TYPE=STD
,NAME=S0002021
,Book Name=486
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF

FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,